# १ प्रथमोध्यायः (परिचात्मकः)

(१) ज्योतिषशास्त्रस्य सामान्यपरिचयः

(२) ज्योतिषशास्त्रस्य मानवजीवने उपयोगीता

(३) ज्योतिषशास्त्रस्य कालानुसारेण वैविध्यम्

**श्री गणेशाय नमः**

विश्ववाङ्मयसमुदाये संस्कृतवाङ्मयमेवसर्वोत्कृष्टं वर्तते। अनादिकालात् आरभ्य सम्प्रतिकंयुगपर्यन्तम् अविच्छिन्नरूपेण शाश्वतम् सार्वभौमश्च वर्तते। साम्प्रतिकम् अस्यवाङ्मयस्य मूलाधारो वेदैव वर्तते। वेदस्य ऋक्-यजुः-साम-अर्थवण इति चत्वारो विभागाः वर्तन्ते। वेदस्य षड्ङ्गानी सन्ति। यथा मुख-नेत्र-श्रोत्र-करौ-नासिका-पादद्वयं वर्तन्ते। तत्र ज्योतिषशास्त्रं वेदस्यनेत्ररूपेण स्वीक्रियते। वेदः प्रवृति यज्ञयागादि वर्तते। यज्ञयागादयः कालश्रयेण एवसम्भवति अत एव कालबोधकं ज्योतिषं वेदाङ्गत्वेन स्वीक्रियते। **भास्कराचार्यानुसारेण -**

**वेदास्तावद्यज्ञकर्म प्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात् कालबोधो यतः स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात।।**
**शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी श्रोतमुक्तं निरूक्तं च कल्पः करौ।**
**यातु शिक्षाऽस्य वेदस्य सा नासिका पादपद्मद्वयं छन्द आद्यैर्बुधैः।**

अतः शब्दशास्त्रं व्याकरणं वेदस्य मुखम्वर्तते। ज्योतिषं निरूक्तः वेदस्य श्रोत्रं कल्पः वेदस्य करौः, शिक्षा नासिका एवं छन्दः वेदस्य पादद्वयं वर्तते। शास्नात् इति शास्त्रम् ज्योतिषं च यत् शास्त्रम् ज्योतिषशास्त्रम्, ज्योतिषशब्देन अनेके अर्थाः भवन्ति। यथा प्रकाशः कालपरिमापकः ज्योतिः नेत्रम् इत्यादयः। अत्र ज्योतिष शब्द वेदाङ्गत्वेन शास्त्ररूपेण कालपरिमापक रूपेण च स्वीकृतम् इति। अत्र एतदपि ध्यातव्यं यत् सुमुहूर्तम् ज्ञात्वा एव यज्ञयागादि क्रिया विशेषाःसम्पध्यमानाः सफलाय कल्पन्ते। मुहूर्तज्ञानं ज्यौतिषशास्त्रम् विना नैवसम्भवति। अतः वेदाङ्गे ज्योतिषस्य ज्ञानं अतीव आवश्यकं वर्तत्रे। यथा नेत्रविहिन व्यक्तिः पाणि पादौ श्रोत्र घ्राणादि सहितं अपि लोके किञ्चित् अपि कार्य नसम्भवति एवमेव प्रकारेण ज्योतिषं बिना वेदः अपूर्णा वर्तते। यथा -

**वेदचक्षु किलेदं स्मृतं ज्यौतिषं**
**मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभि -**

**श्चक्षुषाङ्गेन हीनो न किञ्चित्करः ।।**

ज्योतिषशास्त्रम् ब्यवहारशास्त्रत्वेन स्वीक्रियते जनैः। अस्य वहुमुखउपयोगिता वर्तन्ते। यथा मानवजीवने शुभाशुभफल - कर्मसम्पादानार्थे मुहुर्तादिज्ञानं ग्रहाणां कालावस्थाइत्यादि ज्ञानाय शास्त्रस्यास्य अत्यावश्यकता..स्ति। यथोक्तम् -

**यथा शिखा मयूराणां नागनां मणयो यथा।**
**तद्वद्वेदाङ्गसाशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ।।**

वेदाङ्गेषु व्याकारणं हि शब्दार्थ ज्ञानेः प्रयोजनम छन्दशामपि प्रयोजनम यतिगतिलयसहितउच्चारणमेव ज्योतिषशास्त्रम् नकेवलम् शास्त्रदृष्ट्या अपितु व्यवहारदृष्ट्यापि उपयोगिवर्तते। षडाङ्गमध्ये व्यवहारिरूपेण प्रत्यक्ष शास्त्रएकऐव ज्योतिषं वर्तते। ज्योतिषगणितेन चंद्रसूर्ययोः ग्रहणविषये यद्गणना सिद्धयति तद्नुसारेणैव प्रत्यक्षरूपेण जनैः दृश्यते जगत्यस्मिन् अतोःहि प्रत्यक्ष शास्त्रत्वेन स्वीक्रियते। यथोक्तम्केनचित्-

**अप्रत्यक्षाणि शास्त्राणि विवादस्तेषुकेवलम्।**
**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।।**

प्रतिवेदस्य पृथकत्वेन शाखानुसारेण ज्योतिषं वर्तते। लगधाचार्येणनिर्दिष्टं इति। तेष्वपि सामवेदस्यज्योतिषं अप्राप्तंइति। वेदत्रयस्य ऋकयजुअर्थर्वाणाम् ज्यौतिषम् उपलभ्यते। यथा परम्पराया वेदाः अपौरूषेयाः तत्सम्बन्धि ज्यौतिषं अंगरूपेणास्य प्रादुर्भाव विषये कालः सुनिश्चितः नास्ति। प्रतीयतेयत् वेदकालादेव अस्याऽपि अवस्थितिः सम्प्राप्ताआसीदिति। यथाश्रुयते ज्योतिषपरम्परायां सूर्यसिद्धान्तग्रन्थः मयासूरनामकोकश्चित्जनः सूर्योपासनैव संग्रथितः। यथोक्तंम् पराशरेण स्वरचितगन्थे यत् प्रथमोऽहि यज्ञादि कालनिर्णयाय परमपिताब्रह्मणा ऋषीन्प्रदतं ज्योतिषंइति। ततः प्रभृति ज्योतिषशास्त्रधारा अजस्रूपेण अष्टादशः ऋर्षिभः निसृताः अनेनकारणेन शास्त्रास्यास्यादिप्रवर्तकाः सूर्यादयः कथिता। एतेषां नामानि यथा-

**सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिःपराशरः।**
**कश्यपो नारदो गर्गो मारीचिर्मनुरङ्गिराः ।।**

**लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**

**शौनकोऽष्टादशश्चैते ज्योतिः शास्त्र प्रर्वतकाः।।** (वृ.पा.हो.शा. 1/6)

इदमेव स्कन्धत्रयेण सिद्धान्त - संहिता -होरारूपेण विभक्तमिति। यथोक्तं महर्षिनारदेन -

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम्।**

**वेदस्यनिर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम।।**

एवमेव प्रकारेण वराहमिहिरादिभिः स्कन्धत्रयात्मको ज्योतिषस्य वर्णनं कृतमिति। केचित्तु पञ्चस्कन्धात्मकमपि मन्यन्ते। कैरलिः शकुनश्चेति द्वौ भेदौ संयोज्येदं पञ्चस्कन्धमप्युच्यते।

**पञ्चस्कन्धमिदं शास्त्रं होरागणित संहिताः।**

**कैरलिः शकुनश्चैव ..........................** ।।इति।।

गणितशब्देन स्वीक्रियते। गणितस्कधस्याऽपि ग्रहगणितं, पाटीगणितं, वीजगणितं इत्यादि रूपत्रयेण विभक्तम्।

**गणितस्कन्ध**

अस्मिन् विभागे ग्रहाणां खगोलीय स्थिति तेषां गति तथाच फलित ज्योतिषस्य पूर्वरूपमपि तिथि नक्षत्रादि गणनाविषय स्वीक्रितम्।

**भास्कराचार्यानुसारेण सिद्धांतलक्षणम्-**

**त्रुट्यादिप्रलयान्तकालगणना मानप्रभेदः क्रमा -**

**च्चारश्च द्युषदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः।**

**भूधिष्ण्य ग्रह संस्थितैश्च कथनं यन्त्रादि यन्त्रोच्यते।**

**सिद्धान्तः स उदाहृतोऽत्र गणित स्कन्धप्रबन्धे बुधैः।।**

**सिद्धान्तस्य प्रमुखग्रन्था :-** सूर्य सिद्धान्त, पञ्चसिद्धान्तिका, सिद्धान्त शिरोमणिः इत्यादि अनेके ग्रंन्थाः वर्तन्ते।

## संहिता स्कन्ध

अस्याम् साखायाम् भूतले जायमानानाम् ग्रहप्रभावाः तथा च समष्टिरूपेण जीवादिनां उपरि शुभा शुभफलं ज्ञायते नतु व्यष्टिरूपेण। अपि च नक्षत्रादिनाम् ग्रहचारादिनाम् एवं च पृथ्वीब्याम् उल्कापात-भूकंप विशेषः आकाशे च ग्रहगतोत्पातादिनां सम्यक् ज्ञानं जायते। संहिता विभागे प्राधान्येन येग्रन्थाः स्वीकृयते यथा - नारदसंहिता, वृहत्संहिता च एतेश्ववपि केवलं वृहत्संहितैव प्राप्यते।

## होरस्कन्ध

वर्तमानसमये सर्वाधिकलोकप्रियहोरास्कन्ध एव वर्तते। होरास्कन्धे व्यक्तिविशेषस्य भूतभविष्यवर्तमान् इत्यादि ज्ञानं भवति। होरा शब्द अहोरात्रस्य आद्यन्तवर्णलोपात् होरा इत्युच्यते। आचार्य वराहमिहिरानुसारेण -

**हारेत्यहोरात्र विकल्पमेके वाच्छन्ति पूर्वापरवर्णलोपात्।**
**कर्माजितं पूर्वभवे सदादि, यत् तस्य पक्तिं समभिव्यनक्ति।।**

अतः होरायां पूर्वजन्मस्य संचितकर्मात् इह जन्मनि का - का भवति इत्यादि ज्ञानं भवति।

ज्योतिषशास्त्रस्य पादुर्भावकालात् अद्यपर्यन्त विकाशक्रमः-

(1) प्राग्वैदिककाल या अज्ञात काल (2) वैदिक संहिताकाल या आदिकाल

(3) वैदाङ्गकाल या पूर्वमध्यकाल (4) सिद्धान्तकाल या उत्तरमध्यकाल (5) आधुनिककालः

वैदिकसंहितायां ज्योतिषस्य स्वरूपं दृष्ट्वा कथितुं शक्यते यत्पूर्वमपि ज्योतिषस्य यन्किञ्चिदपि स्वरूपं सुनिश्चितमासीदिति। अतः वैदिक संहिता कालात् पूर्वस्य काल एव प्राग्वैदिककाल इति ज्ञायते।

ऋग्वेदकालात् आरभ्य लगधाचार्यस्यकाल पर्यन्तं वैदिककालं मन्यन्ते। लगधाचार्यस्य वेदाङ्ग ज्यौतिषात् आरभ्य आर्यभट्टस्य आर्यभट्टीयम् पर्यन्त

पूर्वमध्यकाल: मन्यते। अत्रहि सिद्धान्त स्थिरीकरणं ज्योतिषस्य त्रयस्कन्धे स्पष्टविभाजनमं पंञ्चाङ्गादिनाम् आविर्भाव इत्यादि वेदाङ्ग कालस्य वैशिष्ठ्यम् वर्तते।

आर्यभट्टस्य आर्यभट्टीयम् ग्रंथस्य कालात् आरभ्य कमलाकरस्य सिद्धान्त तत्वविवेक पर्यन्तम् वराहमिहिर- भास्कराचार्य इत्यादि प्रमुखाचार्याणां काल एव सिद्धान्तकाल

व उत्तर मध्यकाल: मन्यते। ज्योतिषस्य पृथक-पृथक पूर्णत्रयस्कन्धात्मकज्ञान वराहमिहिराचार्यस्य एव वर्तते। सिद्धान्ते भस्कराचार्य: अद्वितीय आचार्य आसीत्।

## ज्योतिषशास्त्रस्य विकास:

अनादिकालात् आरभ्य वर्तमान वैज्ञानिककालपर्यन्तं ज्योतिषशस्य उत्तरोत्तर विकास: अभवत्। वेद संहितायां ज्योतिषविषयं प्राप्तंभवति। अत: तत्पूर्वाऽपि ज्योतिषस्य किमपि स्वरूपं आसीत् इति। आर्षग्रंथे वेदेषु अपि ज्योतिषस्य वर्णनम अस्ति:। अत: (अस्य) ज्योतिषशास्त्रस्य प्रारंभकाल: सुनिश्चितम् नासीद। वेदाङ्गेषु ज्योतिषस्य गणना वर्तते। अत: प्रतेकवेदस्य पृथक-पृथक ज्योतिषं आसीत्। परंतु दौर्भाग्यवशात् सामवेदस्य ज्योतिषं वर्तमान समये प्राप्तं नभवति। किन्तु वेदत्रयस्य ऋकयजु:अथर्वणस्य ज्योतिषं प्राप्तं भवति। ज्योतिषस्य विकासास्थिति व कालक्रमेण चतस्र: कालव्यवस्था भारतीय ज्योतिष शास्त्रस्य कर्तुं शक्यते।

(1) वैदिक काल:
(2) वेदाङ्ग काल:
(3) सिद्धान्त काल:
(4) आधुनिक काल:

## वैदिक काल:

ऋग्वेदकालादारभ्य लगधाचार्यस्य वेदाङ्ग ज्योतिषात् पूर्वकाल वैदिककाल मन्यते। लगधाचार्यः एव वैदिकज्योतिषस्य प्रणेता मन्यते। ज्योतिषशास्त्रे प्रथमं कालबोधकरूप एव प्राप्तं भवति। ऋग्वेदे सृष्टिउत्पत्ति तस्य क्रमस्य च विषयेवर्णनं प्राप्तं भवति। गगनमण्डलं सूर्याचंद्रमसौ नक्षत्राणि ताराः ऋतून्-मासान् दिवसांश्चादाय वेदेषु वर्णनं समुपलभ्यते। भूमि एवं अंतरिक्ष विषये ऋग्वेदेवर्णितम् यथा-

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्।। ऋ.10/90/14
चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत्।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।। ऋ.10/90/13

एवमेवप्रकारेण यजुर्वेदेऽपि मेघ एवं अंतरिक्ष इत्यादिनां वर्णनं प्राप्तंभवति-

नमोस्तु रूद्रेभ्यो ये दिवि येषां वर्षामिषवः। यजुः 16/64
नमोस्तु रूद्रभ्ये येऽन्तरिक्षे येषां वातइषवः। यजुः 16/65

ऋतुकारणं सूर्य एव इत्यादि ऋग्वेदे (1/95/3) वर्णितम्।

पूर्वामनु प्रदिशं पार्थिवानामृतून प्रसासद्विदधावनुष्ठु ।

युग शब्द कालबोधक वारंवारः वेदेषु प्राप्तं भवति। देवानां पूर्वेयुगे सतः सदजायत। ऋ.10/72/2

युगे युगे विदध्यं गृहणद्भ्योग्नेरधिं यशसं धेहि नब्यसीम्। ऋ.6/8/5
या औषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। ऋ.सं. 10/97/1

वेदेषु युगशब्द कालबोधक वर्तते। अत्र स्त्रियुगं शब्दस्यार्थः युगत्रयअपि वर्तते। महिधरानुसारेण त्रियुग शब्दः वसन्त- वर्षा एवं शरदऋतु वाचिवर्तते। अतः तत्र युग शब्द केवलं कालबोधक एव वर्तते। परंतु ऐतरेयब्राह्मणे युगचतुष्टयस्य नामप्राप्तं भवति-

**कलिः शयनो भवति सञ्जिहानस्तु द्वापरः।**
**उतिष्ठंस्त्रेत्रा भवति कृतं सम्पद्यते चरन्।।**

एवमेव प्रकारेण वर्षमासादिवर्णन अपि वेदेषु वर्तते-

वेदमासो धृतव्रतो द्वादश प्रजावत। वेदाय उपजायते। एवमेव प्रकारेण तैतरीय संहितायां मधुमाधवादि द्वादश मासानां नामपि वर्णनं वर्तते। तत्र संसर्प नामक अधिमासस्यापि वर्णनं वर्तते। एवमेव प्रकारेण तत्रैव दक्षिणायन उत्तरायण इत्यादि, तस्मादित्यः षड्मासो दक्षिणेनैति षडुतरेण वर्णितम् वैदिककाले सौर एवं चान्द्रमासस्याऽपि ज्ञानं वर्तते। तैतरीय संहितायां पूर्णिमान्त एवं अमान्त मासस्याऽपि वर्णितम। तत्रैव तिथ्यादिनां अपिवर्णनं वर्तत्रे। ऐतरेय ब्राह्मण एवं गोपथ ब्राह्मणे पूर्णिमा कुहू एवं सिनीवाली नामक अमावस्या वर्णितम्। या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनीवली योत्तरा सा कुहुः। वैदिक काले गगनेस्थित ज्योतिपिण्डानां नक्षत्र नामात् ज्ञायन्ते। तत्र नकेवलं सप्तविशंति अन्येषु नक्षत्रेषु अपिवर्णितम्। तत्र नवग्रहाणां मध्ये सूर्याच्चन्द्रमसौ अनेकस्थाने स्पष्टं वर्णितम। अन्यग्रहाणां सम्बधित विषयवस्तु अपि प्राप्तं भवति। एवमेव प्रकारेण वेदेषु ज्योतिषविषयं प्राप्तं भवति।

## वेदाङ्गज्योतिषम्

वेदानां सम्यगर्थावबोधकत्वमेव वेदाङ्गानां वेदाङ्गत्वमं। षड्वेदाङ्गानि - व्याकरणं- ज्योतिषं -निरुक्तं -कल्पं -शिक्षा- छंदः। वेदाङ्गज्योतिषः वैदिक कालस्य पर्यावसान काले प्रादुर्भवत। लगधस्य वेदाङ्गज्योतिषं एव प्रधानो ग्रंथः। वशिष्ठकाश्यपपराशर गर्गनरदादिप्रोक्ता मौलिकाः संहिता ग्रंन्थाश्र्च वेदाङ्गत्वेन। वेदङ्गज्योतिषे प्रतिवेदस्य पृथक-पृथक ज्योतिषं आसीत्। परंतु दौर्भाग्येन सामवेदस्य ज्योतिषं नैव प्राप्तं भवति। ऋक् ज्योतिषे षट्त्रिशंत्कारिकाः सन्ति। अस्योऽपरि सोमकरस्य व्याख्याद्वयं प्राप्तं भवति। यजुर्वेदज्योतिषे एकोनपञ्चाशत् श्लोकाः सन्ति तथा च अथर्ववेदज्योतिषे द्विषष्ट्युतरैकशतमिताः कारिकाः सन्ति।

## ऋग्वेदज्योतिषम्

ऋग्वेद ज्योतिष्य प्रणेता लगधाचर्य एव इति अस्यैव द्वितीय श्लोकातः सिद्धं भवति।

**प्रणम्य शिरसा कालमभिवाद सरस्वीतम्।**

**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ।।**

तत्रारम्बा दिन ऋतु मासाङ्गानि पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिं कालं प्रणम्य सरस्वीतम् अभिवाद्य लगधस्य महात्मनः कालज्ञानं प्रवक्षामिति वर्णितम्। तत्र पञ्चसंवतसरमय युगस्य पर्वगणना, शुक्लादिज्ञानं पञ्चसंवत्सरे उत्तरदक्षिणायनारम्भ अयनादिन नक्षत्राणि, नक्षत्रस्यनामानि यथासंकेतानि। कला मुहूर्त नाडी इत्यादि वर्णनं तथा च पल-मासक-कुम्भक- द्रोण इत्यादि कालमान संज्ञानां वर्णनं वर्तते। अस्य ऋग्वेदस्य द्वात्रिंशत् श्लोकानुसारेण -

**माघशुक्ल प्रवृतस्तु पौषकृष्णसमापिन।**
**यगद्य पञ्चवर्षाणि कालज्ञानं प्रचक्षते ।।**

कलचक्रनिरूपणविषय एवं वर्तते। वेदाङ्ग ज्योतिषस्य संकलनकालविषये हिन्दुनीमते १२८० विक्रमतः वर्ष पूर्वम्, कोलब्रूकमते १३६० वर्ष पूर्व प्रणीतमिति विश्र्वस्यते। तत्कालीन नक्षत्रगणनासम्पातगत्यन चलनादिनामध्ययनेन वेदाङ्ग ज्योतिषस्य कालस्तु विक्रमतः १४०० पूर्वं वक्तुं शक्यते।

## यजुर्वेदज्योतिषम्

यजुर्वेदज्योतिषे ४९ एकोनपञ्चाशत् श्लोकाः सन्ति। किन्तु एकोनविंशाति श्लोकान् विहाय शेषश्लोकाः किञ्चित्पाठान्तरेणसह ऋग्वेदज्योतिषादेव गृहीताः सन्ति। तत्राऽपि मूलरूपेण कालगणना एव वर्तत्रे। ऋक्ज्योतिषस्य द्वाविंशाति कारिका एवं यजुर्वेद ज्योतिषस्य पञ्चम श्लोकानुसारेण कालज्ञानम् एवं अत्राऽस्ति

युगश्र्च पञ्चवर्षाणि कालज्ञानं प्रचक्ष्यते। (ऋ.ज्यो.३२) तत्रपर्वतिथि युगादि अधिकमासादि वर्णनं वर्तते-

**एकादश भिरभ्यस्य पर्वाणि नवभिस्तिथिम्।**
**युगलब्धं सपर्वं स्यात् वर्तमानार्कभं क्रमात्।।**

उग्रक्रुरादि नक्षत्राणां अपि वर्णितम् -

**उग्राण्याद्र च चित्रा च विशाखा श्रवणाश्वयुक्।**
**क्रूराणि तु मघा स्वाती जेष्ठामूलं यमस्य यत्।।**

वर्तमान समये चित्रा विशाखा श्रवण स्वाती एवं अश्विनी नक्षत्रस्य संज्ञाभिन्न वर्तते। एवमेव प्रकारेण यर्जुज्योतिषम् अपि कालगणना सम्बान्धित् एवं वर्तते।

## अथर्वज्योतिषम्

अथर्वज्योतिषम् होरा सम्बन्धितं ज्योतिषं वर्तते। तत्र चतुर्दश प्रकरणानि व दिषष्ट्युतरैकशतमिता: श्लोका: सन्ति। अत्र निमेषात् आरभ्य लव-त्रुटि, मुहूर्त अहोरात्रादि मानं वर्णितम्। तत्र पञ्चदशमुहूर्तानाम् पृथक पृथक नाम, नक्षत्रं अधिकृत्य शुभाशुभकर्मवर्णनम्, ग्रह उल्का द्वारा नक्षत्रपीडासमयं प्रतेक वर्गे सम्भावित भय इत्यादिनां वर्णनम् वर्तते-

**ग्रहोल्काशनिनिर्घातैः कम्पैर्दाहैश्च पीड्यते।**
**मद्यदभयं भवति तत् तत्प्रवक्ष्यांम्यशेषत:।**

एवं दिनाधिपरूपेण सप्तग्रहाणानामपि वर्णितम्-

**आदित्यसोमो भौमश्र्च तथा बुध बृहस्पति।**
**भृगु: शनैश्र्चरश्चैव एते सप्त दिनाधिपा:।।** तत्र अथर्वज्योतिषं इत्यादि शब्द प्राप्त न भवति परंतु ऋक् यजुर्वेद ज्योतिषात् अपर ग्रथोयम्। परन्तु तत्र मेषादिराशिनां वर्णनं कुत्राऽपि नैव। अत: राश्यादिनाम् ज्ञान पूर्वकालस्य ग्रथोयं वर्तते। अत: तस्य संरचना व विषयादि द्वारा अथर्व ज्योतिषं कल्पीयते।

## वेदाङ्गेषु ज्योतिषम्

ऋक् यजु अथर्वणादय: वेदाङ्गज्योतिषोपरान्त कल्पव्याकरणनिरूक्ता वेदाङ्गेष्वापि प्रसङ्गवशाद ज्योतिषस्य विषय प्राप्तं भवति। आश्वलायन कल्पसूत्रे श्रावण्यां पौर्णमास्यां श्रवणकर्म इत्यादि। मासे नक्षत्रप्रयुक्तनाम प्राप्तं भवति। मधुमाधवादि मासानां नामानि अपि श्रौतसूत्रे ४/१२ वर्णितम्। वसन्तादय ऋतूणां वर्णनम् अपि वर्तते। तिथ्यादिनां स्पष्टवर्णनं नास्ति तथाऽपि चतुर्दशी इत्यादि शब्द प्राप्तं भवति। गृहसूत्रेषु ध्रुव अरून्धति इत्यादि सप्तऋषिणां वर्णनं वर्तते -

ध्रुवमरून्धतीं सप्तर्षीनितिदृष्टवा वाचं विसृजेत्।

तथाच कर्मविषेशे शुभनक्षत्रादि नामानि अपि वर्णितानि सन्ति।।
पारस्कर सूत्रेषु विवाह नक्षत्रादि "त्रिषु त्रिषु उत्तरादिषु स्वातौ मृगशिरसि रोहिण्याम्" इत्यादि वर्तमान ज्योतिषे किञ्चित् भिन्न वर्तत्रे। जेष्ठायां क्षेत्रकर्पणम् मूलनक्षत्र जनन पादभेदेषु शुभाशुभवर्णनं अपि वर्तते। बौधायन सूत्रे मेषादि द्वादशराशिनामपि वर्णितम्।

## निरूक्तम्

निरुक्तस्य द्वितीय अध्यायस्य पञ्चविंशति खण्डे क्षण इत्यादि कालबोधक शब्द प्राप्तं भवति। सप्तऋषिणानि ज्योतिषिं (१०/२६) अत्र सप्तऋषिणां वर्णनं वर्तत्रे। तत्र हि दिन-रात्रि- शुक्लपक्ष-कृष्णपक्ष-उत्तरायण एवं दक्षिणायन इत्यादि चतुर्दशअध्याये वर्णितम्। तत्रैव आकाशगुणः शब्द ..... युग सहस्रपर्यन्तमर्ह्यदब्रह्मणो विदु रात्रिं युगसहस्रान्तां तेहोरात्रविदो जना इति ।१४/४। तत्र ब्रह्म अहारोत्रं वर्णितंम्। सहस्रयुगस्य ब्रह्मदिनंभवति। तत्रैव सृष्टिस्थिति एवं लय भवति। तदुपरान्त सहस्रयुगपर्यन्त ब्रह्मरात्रीं भवति। इत्यादि कालमानस्य वर्णनं अस्ति।

## व्याकरणम्

वेदेषु संवत्सर बोधक वर्ष एवं हायन शब्द पाणिनीय व्याकरणोऽपि उल्लिखितोऽस्ति। तत्र नक्षत्र बोधक पुष्यतिष्यौ नक्षत्रे (३/१/११६) १/२/६१ एवं १/२/६२ सूत्रेषु "छन्दसि पुनर्वसोरेकवचनम्" एवमेव प्रकारेण ज्योतिषस्यलिङ्गचोर्ध्वमौहूर्तिके इत्यादि अनेकशब्दाः ज्योतिष सम्बन्धित पसङ्गवशात् वर्णितम्। विकास उत्तरोत्तर रामायण महाभारतेषु विकसित रूपदरिदृष्यते।

संस्कृतवाङ्मये आदिकाव्यरूपेण **वाल्मीकि रामायणे** दिन नामानि, नक्षत्रनामानि षोड्शसंस्कार व्यवस्था इत्यादि विचारादय प्रसङ्गवसात् उल्लिखितो दृष्यते। अतः रामायण काले ज्योतिषशास्त्रस्य विकसित स्वरूपम् आसीत्। तस्मिनकाले स्वप्नादि शुभाशुभ फल एवं शकुनादि फलं अपि प्रचलितोऽस्ति ।

**महाभारतेऽपि** बहवो ज्योतिषसम्बद्ध प्रसङ्ग स्मृता दृष्यते। महाभारते मनुस्मृति सदृश युगपद्धति वर्णितम्। तत्र कृतादि युगानां वर्षादिमान इत्यादि स्पष्टरूपेण वर्णितम्।

तत्र मेषादिद्वादशराशीनां ग्रहस्थिति निर्धारणपद्धति नैव दृश्यते। महाभारेते नक्षत्रगणनां कृतिकातः आरभ्य भरणीपर्यन्तं वर्तते। तस्मिनकाले ग्रह गति ज्ञानं समृद्धमासीत्। शान्तिपर्वाणिं उक्तम् -

**अथं संवत्सराणाञ्च मासानाञ्च क्षयं तथा।**

संस्कृतवाङ्मये आदिकाव्यरूपेण वाल्मीकि रामायणे दिन नामानि, नक्षत्रनामानि षोड्शसंस्कार व्यवस्था इत्यादि विचारादय प्रसङ्गवसात् उल्लिखितो

दृष्यते। अतः रामायण काले ज्योतिषशास्त्रस्य विकसित स्वरूपम् आसीत्। तस्मिनकाले स्वप्नादि शुभाशुभ फल एवं शकुनादि फलं अपि प्रचलितोऽस्ति ।

महाभारतेऽपि बहवो ज्योतिषसम्बद्ध प्रसङ्ग स्मृता दृष्यते। महाभारते मनुस्मृति सदृश युगपद्धति वर्णितम्। तत्र कृतादि युगानां वर्षादिमान इत्यादि स्पष्टरूपेण वर्णितम्।

तत्र मेषादिद्वादशराशीनां ग्रहस्थिति निर्धारणपद्धति नैव दृश्यते। महाभारेते नक्षत्रगणनां कृतिकातः आरभ्य भरणीपर्यन्तं वर्तते। तस्मिनकाले ग्रह गति ज्ञानं समृद्धमासीत्। शान्तिपर्वाणिं उक्तम् -

**अर्थं संवत्सराणाञ्च मासानाञ्च क्षयं तथा।**

**पक्षद्वयं तथा दृष्टवा दिवसानाञ्च सङ् क्षयम्।।** (३०१/४६-४७)

तत्र ग्रहगतो मार्गी गतिवर्णनं वक्री गति वर्णनञ्च ग्रहाणां गतौ सुक्ष्मज्ञानं निर्दिशति। तत्र ग्रहण उल्कादिभि वर्णितास्ति। तत्रैव ऋत, अयन, मास, तिथ्यादिनां वर्णनं प्राप्तं भवति। तस्मिन काले अभिजित नक्षत्रं अपि वर्णितम्। तत्र ग्रहण विषयेऽपि वर्णितम्। एवमेवप्रकारेण महाभारते प्रसङ्गवसात् ज्योतिषसम्बन्धितविषयाणां वर्णितम्। **अन्य पुराणेषु** अपि ज्योतिषविषये सम्यक् वर्णिताऽस्ति। गरूडपुराणे अमृत-सिद्धीयोगः विषयवर्णनपूर्वक दशाकथन एवं दशाफल विषयेऽपि सम्यग् वर्णिताऽस्ति।एवमेव प्रकारेण लगधाचार्यस्य वेदाङ्गज्योतिषारम्भ आर्यभट्टीयम् ग्रन्थस्य रचनापूर्व वेदाङ्गकालः कथ्यते। तस्मिन समये सिद्धान्तानां स्थिरीकरणं ज्योतिषस्य स्कन्धत्रय विभाजनं पञ्चाङ्गानां ज्ञानानि अस्यकालस्य वैशिष्ठ्यम वर्तते।

ज्योतिषशास्त्रस्य विकासक्रमे आर्यभट्टस्य आर्यभट्टीयम ग्रन्थात् आरभ्य अर्थात वेदाङ्ग महाभारतोत्तर कालान्तरं ज्योतिष शास्त्रं पूर्णरूपेण विकसितः अभवत्। कालोऽयं ज्योतिषशास्त्रस्य स्वर्णिमयुगम् वर्तत्रे। अयमेव सिद्धान्तकालसंज्ञयाऽपि ज्ञायते। तस्मिनकाले स्त्रिकन्ध ज्योतिषं पूर्णरूपेण विकसितं अभवत्।

**सिद्धान्त संहिताहोरारूपं स्कन्धत्रयात्मकम्।**

**वेदस्य निर्मलं चक्षुर्ज्योतिः शास्त्रमनुतमम्।।**

कैरलिः शाकुनश्चसंयुक्त पञ्चस्कन्धात्मक ज्योतिषं केचिद्विद्वांशा मन्यते।

प्रमुखाचार्याः संहितास्कन्धे एवं उक्त स्कन्धद्वयोः समाहिता।

**सिद्धान्त कालः**

आर्यभट्टस्य आर्यभट्टीयम् ग्रन्थादारभ्य कमलाकरस्य सिद्धांत तत्वविवेक पर्यन्तकाल एव सिद्धान्तकालःकथ्यते। आर्यभट्ट, वराहमिहिर भास्कराचार्य इत्यादि तत्कालीन प्रमुखाचार्याः आसीदिति। सिद्धान्त ज्योतिषं तन्त्रं व गणितशब्देनाप्याभिधीयते। तत्र ग्रहगणित पाटीगणित बीजगणित सुनिश्चलम्। "गण्यते सङ्ख्यायते येन तदगणितम्" अतः सिद्धान्तस्कन्धे ब्यक्ताव्यक्त गणितं भवति। तत्र त्रुटि आदि कालमानस्य सुक्ष्मरूपादारभ्य महाप्रलयपर्यन्तस्यगणना नवविधकालमानानि, ग्रहचार, ग्रहगति, पृथ्वी एवं ग्रहादिनां स्थिति एवं सुक्ष्मज्ञानार्थे यन्त्रादिनां वर्णनं इत्यादि सिद्धान्त स्कन्धे भवति। भास्कराचार्यऽपि उक्तम्-

त्रुट्यादि प्रलयान्तकालगणना मानप्रभेदः क्रमात्।
चारश्च द्युसदां द्विधा च गणितं यन्त्रादि यत्रोच्यते।।
भूधिष्ण्यग्रहसांतितेद्य कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः।।

सिद्धान्तस्य ज्ञानं विना ज्योतिषशास्त्रस्य ज्ञानं पूर्णं नभवति, वराहमिहिराचार्यानुसारेण (सिद्धान्तज्ञानरहित) नक्षत्रसूचकाः निन्दनीयाः। भास्कराचार्येऽपि सिद्धान्तविना ज्योतिषं अपूर्ण वर्तते। उक्तम् -

जानन् जातकसंहिता सगणितस्कन्धैकदेशा अपि।
ज्योति शास्त्रविचारसारचतुर प्रश्नेष्वकिञ्चित्करः।।
यः सिद्धान्तमनन्त युक्ति विततं नो वेत्ति भित्तौ यथा।
राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः।।

अतः ज्योतिषशास्त्रे सिद्धान्तस्य अतीव महत्वं वर्तते। प्राचनीमर्वाचीन भेदेन सिद्धान्तमपि द्विविधं ज्योतिर्विदाः मन्यन्ते। तत्र पञ्चसिद्धान्ताः सन्ति। प्राचीन पञ्चसिद्धान्ते वराहमिहिरस्य पञ्चसिद्धन्तिकायांस्मृता सूर्यपितामह रोमकपुलिसवसिष्ठ सिद्धान्ता गृहिताः एवं सूर्य सोमवशिष्ठरोमश ब्रह्मसिद्धान्ताः अवार्चीन सिद्धान्त पञ्चकरूपेण ज्ञायन्ते। प्राचीन पञ्चस्द्धिातिकग्रन्थाः

पृथकरूपेण नैवोपलब्धः परन्तु वराहमिहिरस्य पञ्चासिद्धातिकायां संयुक्त रूपेण वर्तत्रे। तत्र भगणादिमान अवार्चीनभगणादि मानात् भिन्नं वर्तत्रे। प्राचीन सिद्धान्त पञ्चकेषु पौलिशसिद्धान्त स्फूटं आसीत्, रोमक सिद्धान्त एव तस्य सान्निधिं तथाच रोमक पौलिश सिद्धान्तादपि सूर्यासिद्धान्त स्फुटं आसीत्। तथा च पितामह एवं वशिष्ठ सिद्धान्त नतत्र सन्निकर्षः। अतः सिद्धान्तस्य विकासक्रमानुसारेण पितामह वशिष्ठाऽदि प्राचीनतम् मन्यते ज्योतिर्विदैः।

पितामह सिद्धान्तानुसारेण दिवार्कानां पञ्चवर्षस्य एकयुग मन्यते। तत्र अर्हगणानयन एवं नक्षत्रानयविधिनां वर्णनं वर्तते। तत्र धनिष्ठारम्भ नक्षत्रगणना पद्धति वर्तते। वेदाङ्गज्योतिष एवं पितामह सिद्धान्तस्य गणित समान एव वर्तते। पितामहस्तु भौमादि ग्रहाणां गणिताऽपि वर्तते। तदुरिक्त अधिकांशसमान एव वर्तते। अस्य मूलरूपं नप्राप्तवन्तः।

पञ्चसिद्धान्तिका ग्रंन्थे वसिष्ठ सिद्धान्त सम्बन्धिता त्रयोदश गाथाः सन्ति। तत्राऽपि सूर्यचन्द्रस्य एव गणितं वर्तते। तथा च आधुनिकविधिद्वारा तिथि नक्षत्रानयन पद्धति तथा च रश्यांशकलादि मानं अपि वर्तते। तत्र विशेष रूपेण छायाविचारोऽधिकं निरूपितं।

पञ्चसिद्धान्तिकायां अधिकाधिक विषयवस्तु रोमक सिद्धान्त सम्बन्धित एव वर्तते। तत्र अर्हगणसाधन अधिमास तिथिक्षय, स्पष्ट सूर्यचन्द्रानयन विधिः तथा ग्रहणानयन विधि इत्यादि वर्णितम्।

पौलिस सिद्धान्तस्य अर्हगणः रोमक अर्हगणस्य साम्यं दृश्यते। पौलिस सिद्धान्ते भौमादिग्रहाणां गतिस्थिति इत्यादि विषये कुत्राऽपि वर्णनं नास्ति। तत्र उदय-अस्त-मार्गी- वक्रत्वादि निर्दिष्टम्।

पञ्सिद्धान्तिका ग्रन्थस्य चतुर्थ अर्यानुसारेण सिद्धान्त पञ्चकेषु सूर्यासिद्धान्तः एवं सर्वाधिक स्पष्ट सिद्धान्त रूपेण गृहीतः। सूर्यासिद्धान्तोऽपि त्रिविधः स्मर्यत्रे। सूर्यासिद्धान्ते न केवलं सूर्य चन्द्रस्य सर्वेषां ग्रहाणां गत्याऽपि वर्णितम्। कालमान ग्रहाणांभगण, चन्द्रमास, तिथयः इत्यादिनां सम्यक वर्णनं वर्तते।

सिद्धान्त ग्रन्थे भिन्न भिन्न प्रकरणे ग्रहगणितं भवति। प्रकरणेस्य अधिकार व अध्याय इति नामेन ज्ञायन्ते। तेः निम्नलिखित :-

(1) मध्यमाधिकारः (2) स्पष्टाधिकारः (3) त्रिप्रश्नाधिकारः (4)

चन्द्रग्रहणम् (5) सूर्यग्रहणम् (6) छायाधिकार: (7) उदयास्ताधिकार: (8) शृङ्गोन्नति (9) ग्रहयुति (10) भग्रयुति (11) महापात इत्यादय:।
केषांचित् ग्रन्थे अधिकार संख्या न्यूनाधिक्यं वर्तते। अपितु तस्यविषयवस्तु पूर्वोक्ता एव वर्तते।आधुनिक सिद्धान्तरूपेण -सूर्यसिद्धान्त (आर्यभट्टीयम्) सिद्धान्तशिरोमणि: ग्रहलाघव,लीलावती इत्यादि प्रमुखग्रन्था: वर्तन्ते।

**आधुनिककाल:**

ज्योतिर्विद कमालाकरस्य सिद्धान्त तत्व विवेक ग्रन्थस्यरचनात् अनन्तरं आधुनिककाल: मन्यते गणकै:। तस्मिन्कालपर्यन्तं स्त्रिकन्ध ज्योतिष: पूर्णरूपेण विकसितं अभवत्। आधुनिककाले विशेषरूपेण होरास्कन्धस्य प्रचार तथा सिद्धान्तश्र्च अपि उत्तरोत्तर विकास दृश्यते। वर्तमान समये ज्योतिषगणित तथा आधुनिक वैज्ञानिक गणित द्वारा निर्णित ग्रहण इत्यादि काल साम्य एवं वर्तते। अत: वर्तमान ज्योतिष गणित पूर्णरूपेण वैज्ञानिक तथा च सुक्ष्म: वर्तते। आधुनिककाले सिद्धान्त होराइत्यादि विषयाणां सुक्ष्मरूपेण संसोधनपूर्वक हिन्दी टीका आधिकाधिकग्रन्था सर्वसुलभा वर्तते। अस्मिन काले सिद्धान्त चूडामणि ताजिककौस्तुभम् होरारत्नम् करणकौस्तुभ: होराकौस्तुभ:, मुहूर्तगणपति, गणकप्रिया पश्नमाणिक्यमाला, ग्रहगणित चिन्तामणि यन्त्रराजघटम् इत्यादि सिद्धान्त-प्रश्न-होरा-शकुन शस्त्रादिनां विकासं अभवत्। तदनन्तरं प्राचीन ग्रन्था हिन्दी तथा प्रांतीय भाषायां अनेका व्याख्याकारा: स्वकार्यं सम्पादयति।

**2 -ज्योतिष शास्त्रस्य मानवजीवने उपयोगिता**

ब्रह्मण: सृष्टौ मनुष्यसृष्टि: अतीव अनुपमेया महत्वपूर्णा गरिमापूर्णा च वर्तते। कारणं तत्र सर्वेषांजीवानां मध्ये मनुष्येषु बुद्धिबलं ज्ञानबलं च सर्वश्रेयस्करं वर्तत्रे। यथोक्तम् वेदे "अविद्यायामृत्यंतीत्वा विद्यामृतमस्नुते" (इशोपनिषाद्) इति निवृत्ति उपदेशपरक अनेकानि वचनानि लभ्यन्ते। अनेन कारणेन यत् सिद्धयति अस्यवाङ्गमयस्य भागद्वयं वर्तते। (१) अविद्या (२)विद्या च इति। अनेन शब्देन ज्ञायतेयत् विद्या शब्देन ज्ञान परा अविद्या शब्देन विज्ञान पर ज्ञायते। सर्वशास्त्राणां चरमंलक्ष्यं च वर्तते। पुरूषार्थ सिद्धी:। पुरूषार्थ: चतुर्विधं वर्तते। धर्मार्थकाम मोक्ष भेदेन। तत्र धर्मो हि बुद्धि विषय: अर्थश्च शरीर विषय कामश्र्च मनसो विषय: मोक्षस्तु आत्मनो विषय:। एतेषां यथायोग्य प्रवृत्ति निवृत्ति उपदेश

प्रतिपादनम् अश्यशास्त्रस्य वौशिष्ठ्यम् वर्तते। ज्योतिषशास्त्रे उक्तत्रयस्य धर्मार्थकामानां अनुष्ठानं कदा कीदृशः, कथं कुत्र च करणीयम् इत्यस्य निर्णयं ज्योतिषे वर्तते। मानवजीवनस्य जन्मतः आरभ्य मृत्युपर्यन्तम कालानुसारेण विधिः शास्त्रै निर्दिष्टम् किन्तु कालनिर्धारणं तत संसुद्धिः एवं च स्थान, समय, प्रहरादिनां संशोधनम् ज्योतिषशास्त्र द्वारा एवमर्हति। अनेन ज्ञायते अस्य शास्त्रस्य कियति महती वर्तते। अस्य शास्त्रस्य उपयोगिता विषये अधोनिर्दिष्ट रूपेण विविच्यते।

(1) मानव जीवनस्य महत्वम्

(2) तत्वजीवने शास्त्राणां अवदानम्

(3) ज्योतिषस्य अनिवार्यता इति।

**(1) मानवजीनवस्य महत्वं : -**

अस्मिन व्रह्माण्डे भगवतस्य अद्वितीय सृष्टिः मानवजीवन एव वर्तते। मानवजीवनस्य अतिरिक्त पशवः अपि आहार निद्रा भय इत्यादयः भवन्ति। उक्तम् -

आहार निद्रामय मैथुनानि सामान्यमेतदपशुभिनराणाम्।

अतः मानवजीवनातिरिक्ताऽपि भय, अवस्था इत्यादि विषये ज्ञायन्ते, परन्तु तस्य परिहारदि तेषांकृते सम्भवनास्ति। चतुर्थपुरूषार्थमोक्षस्यकेवलं मानव एवं तस्याधिकारि वर्तते। ८४ लक्ष्ययोनिनां मध्ये मनुष्ययोनि सर्वोत्कृष्टं वर्तते। तत्र जलजाः ९ लक्ष्या, स्थावराः २० लक्ष्या, कृमिकिटादी ११ लक्ष्याः, पक्षिः १० लक्ष्या, पशवः३० लक्ष्या, तथा च मानवाः ४ लक्ष्या अस्ति इति वर्णितम्। श्रुति - स्मृति पुराणानुसारेण ज्ञानात् एव मोक्षम् भवति। ज्ञानप्राप्ति मानवजीवने सम्भवति अतः चतुरासीती लक्ष्य योनिमध्ये मानवजीवनं उत्कृष्टं वर्तते।

मोक्षप्राप्तिः मानवस्य पशुवत् जीवने वा केवलं देवतार्चन स्नानसंध्यादि क्रियया नभवति। कारणं ज्ञानादेव मोक्षः। ज्ञानं व्यवहारिकं वा वैज्ञानिकं भवेत्, केवलम् आध्यात्मिकं भवेत् तेनापि न मोक्षप्राप्तिः। अर्थात् सर्वात्रिक ज्ञानम् प्राप्तब्यम्। तत्र ज्ञानं शास्त्राणां अध्ययनेन सह अधीत विद्यानां आचरणेन भवति। तदाचरणम् विना विद्या कृतं चेत् निष्फलः। बुद्धिः प्राणिषु अपि भवति। किन्तु प्राणिनः शास्त्राध्ययनम् वा आचरणं कर्तुं न शक्नुवन्ति, अतः मनुष्य बुद्धि एव

मोक्षार्थ श्रेष्ठः। अतः चुतरशीतिलक्षयोनिं त्यक्त्वा मोक्षगतिं प्राप्तुं मानवः एव योग्यः।

### (2) तत्जीवने शास्त्राणां अवदानम्

सर्वसम्प्रदायेषु स्वीकय संस्कृति अस्ति। सर्वसंस्कृतिषु सनातन धर्मस्य संस्कृति श्रेष्ठा। कारणं सनातन धर्मसंस्कृत्याम् जन्म संस्कारात् (गर्भाधानात्) आरभ्य मरणोत्तर संस्कारेषु संस्कृति कालक्रमेण भिन्न-भिन्न संस्कारैः व्याप्ता। सनातन धर्मस्य संस्काराः चतुर्विध पुरूषार्थ सिद्ध्यर्थम् स्व-स्व काले मानवं स्वगतिम् साधयितुम् प्रेरयन्ति। ते संस्काराः शास्त्रेषु एव उपदिष्टाः। शास्त्रेषु केवलं इतिहासदर्शिनि वार्ताः न सन्ति। किन्तु वैज्ञानिक बुद्ध्या समाजरिति, उत्कृष्टोन्नति, राजनिति, मोक्षरितिः, सुव्यवस्थिततया प्रतिपादिताऽस्ति। यथा व्याकरणे प्रथमं परस्मैपदम्, पश्चात् आत्मनेपदम् इतिक्रमेण बोधोजायतेयत् आत्मकल्याणं सर्वैः कर्तव्यम्, किन्तु तत्पूर्वं परजनहितः परेषां कल्याणं कर्तव्यम्। परकल्याणेन स्व कल्याणं साधनावृतिः शास्त्रेषु सर्वत्र दरिदृश्यते। शास्त्रपठनेन विद्वद् वुद्धिः जायते किन्तु

तस्य दुरूपयोगः न भवेत् तदर्थम् शास्त्रेषु समाजसिमाभिः ब्राह्मण-क्षत्रिय-वैश्य-शुद्रादि वर्ण विभागैः स्व स्व कर्मज्ञात्वा उत्कृष्टसमाज रचनायाः बुद्धि अस्ति। यथा यजधातो उत्पन्नः यज्ञ शब्दः आत्मउन्नति कारकः। किन्तु यज्ञकरणेन यज्ञ आवश्यक वस्तूनां निर्माण वा विक्रय कर्तृणां कुम्भकारः, कृषकः, ब्राह्मणः, प्रतिमाकारः, पुष्पविक्रेता, वस्त्र विक्रेता, इत्यादिनां जीविका प्राप्तिः भवति। अर्थात् तया जीविकया यज्ञकर्तायाः एव न उत, उपरोक्त सर्वेषां कल्याणं भवति। एषा यज्ञ विधिः शास्त्राधारेण करणेन पञ्चतत्व शुद्धिः भवति। अर्थात शास्त्राणि सम्पूर्ण समाजस्य कल्याणं वातावरणश्य च शुद्धिं सूचयन्ति।

### (3) ज्योतिषस्य अनिवार्यता

हिन्दूसंस्कृतवाङ्मय जन्मतः मृत्युपर्यन्तं ज्योतिषस्य अतीव आवश्यकता वर्तते। षोडश संस्काराणाम् शुभाशुभ काल ज्ञानार्थे ज्योतिषद्वारा एव सम्भवति। ज्योतिष शास्त्रात् एव शुभाशुभ कालस्य ज्ञानं भवति। चूडाकर्म-विद्यारम्भ-उपनयन-विवाहादि शुभाशुभ कालस्य निर्णयः ज्योतिष द्वाराएव सम्भवति। वेदवर्णित यज्ञ यागादिनां कालनिर्णयं ज्योतिष करोति। अत एव वेदस्य अङ्गेषु चक्षुरूपेण स्वीक्रियते।

अतएव अशुभस्य परिहारादि ज्योतिष शास्त्रात् एव ज्ञानं सम्भवति। समष्टिरूपेण वृष्टि-भूकम्प इत्यादिनां ज्ञानमपि ज्योतिषशास्त्रात् एव सम्भवति।

अनेन सिद्धयति यत् मानवजीवने समष्टी-व्यष्टि इत्यनयों रूपेण अस्य शास्त्रस्य महति उपयोगिता प्रतीयते अनुभूयन्ते च जनाः। यस्यकस्यापि जीवने किं कार्यं, कदाकार्यं, कथं कार्यम्, कियत् कार्यं च इत्यादिनां प्रश्नानां समाधानं ज्योतिषं विना अशक्यं इति। शक्यं चेत् तर्हि वेदाङ्गत्वेन नेत्रत्व रूपेण नस्वीकरणं आसीदिती, योतो हि दृष्टिं विना कथं पथप्रदर्शनम् इति च चिन्तयम्।